# माध्यमिकशिक्षापाठ्यक्रमः

# संस्कृतसाहित्यम्

**कक्षा : ९-१०** **विषयसङ्केतः : (कक्षा ९** Sal. 271 **कक्षा १०** Sal. 272)

**पाठ्यघण्टा : ४** **वार्षिककार्यघण्टा : १२८**

## १. परिचयः

वाङ्मयं ललितकलाया अन्यतमो भेदो मन्यते । विश्वस्य सकलानि वस्तूनि वाङ्मये निबध्द्धुं शक्यन्ते । अस्य बह्यः शाखाप्रशाखाः सन्ति । भाषाणां विषयाणां चाधारेण इमाः शाखाप्रशाखाः सञ्जायन्ते । एतासु संस्कृत वाङ्मयं नैकविधैर्दृक्कोर्णैविशिष्टं महोवं निवहति । संस्कृतवाङ्मयं ननु सर्वप्राचीनत्वं वाङ्मयमस्ति । वेदानामपौरुषेयत्वं संस्कृतवाङ्मयस्य सर्वप्राचीनत्वं प्रमाणयति । वेदानुपकुर्वन्ति पुराणानि लौकिकसंस्कृतवाङ्मयस्य निधित्वेन विद्यमानानि सन्ति । वाल्मीकिकृतं रामायणं व्यासकृतं महाभारतञ्च पौरस्त्यसभ्यताया इतिहासस्य दर्पणभूतं ग्रन्थरत्नं वर्तते । पञ्चमवेदत्वेन वर्णितत्वादपि एतेषां महोवाऽऽख्यापनमाधिक्येन जातमस्ति । यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित इति महाभारतमुद्दिश्य स्वयं महाभारतीवाणी संस्कृतवाङ्मयस्य सर्वज्ञानभाण्डागारत्वं पुष्णाति । वैदिकवाङ्मयेन, पुराणैः, रामायणेन, महाभारतेन चानुप्राणितायां संस्कृतसाहित्यस्य काव्यपरम्परायां कालिदासादयोऽनेके विश्वविश्रुताः कवयः, भरतादयोऽनेके काव्यशास्त्रिणश्च समभवन् । कालिदासादीनां कवीनां काव्यानुशीलनेन काव्यशास्त्रिणो नैकान् काव्यसिद्धान्तान् प्रतिपादयामासुः । कवयश्च काव्यशास्त्रिणां काव्यसिद्धान्ताननुसृत्य नैकानि काव्यानि रचयामासुः । एवं परस्परं भावयद्भिस्तैः संस्कृतवाङ्मयस्य काव्यपरम्परा अद्यावधि निरवच्छिन्ना वर्तते ।

संस्कृतकाव्यानि लोकोत्तरसौन्दर्याधायकानि नीरक्षीरविवेकसामर्थ्योद्भावकानि च सन्ति । कलात्मकशब्दार्थचमत्कारयुताभिः सूक्तिभिः सदसच्चरित्राणां वर्णनेन च संस्कृतकाव्यानि विद्यार्थिषु सहजतया सदसद्विवेकसामर्थ्यं निदधति । संस्कृतकाव्यशास्त्राणि रसभावादीनां काव्यात्मतोवानां, छन्दोऽलङ्कारादीनां काव्यसौन्दर्याधायकतोवानाञ्च विवेचनं कुर्वन्ति । अतस्तेषां शिक्षणेन विद्यार्थिनः रसभावादिभिश्छन्दोऽलङ्कारादिभिश्च काव्यसमीक्षणोद्यता भवन्ति । काव्यानां काव्यशास्त्राणां च शिक्षणस्य इदमेव प्रयोजनमुद्दिश्य राष्ट्रिय-पाठ्यक्रम-प्रारूपस्य निर्देशनानुसारेण नवमदशमकक्षयोः संस्कृतसाहित्यस्य पाठ्यक्रमोऽयं विकसितो वर्तते । अत्र तादृशा गद्यपद्यमयाः काव्यांशाः समाविष्टाः सन्ति, ये छात्रान् सहजतया संस्कृतव्यवहारेषु प्रवृत्तान् कारयन्ति । पुनरत्र काव्यस्वरूपस्य काव्यस्याधारभूततोवानां च ज्ञानाय केचिच्छन्दोऽलङ्काररसादयो विषया अपि समाविष्टाः सन्ति । आधुनिकशिक्षणपद्धतिमवलम्ब्य निर्मितेऽस्मिन् पाठ्यक्रमे छात्राणां श्रवण-भाषण-पठन-लेखनशिल्पविकाससहयोगिनः प्रयोगाभ्यासप्रधानाः सर्जनात्मक प्रतिभा प्रर्शनानुकूलाश्च विषयाः सन्ति । एतदर्थमयं पाठ्यक्रमो माध्यमिकसाहित्यविषयाध्ययनविधौ विद्यार्थिनां श्रवण-भाषण-पठन-लेखनरूपाणां चतुर्णामेव भाषिकशिल्पानां विकासाय मौलिकप्रतिभाप्रकाशनाय च प्रयतते । विषयशिक्षणमाध्यमेन विद्यार्थिनां भाषिककौशलप्रवर्धनं साहित्यरचना-सामर्थ्योद्भावनञ्च पाठ्यक्रमस्यास्य हृत्स्थानीयमुद्देश्यमस्ति । संस्कृतस्य व्यावहारिकत्वसम्पादनेन, संस्कृतसाहित्यस्य व्यवहारोपयोगितायाः सुनिश्चयेन, रुचिमनुसृत्य विद्यार्थिनामाकाङ्क्षापूरणेन च शिक्षाया राष्ट्रियोद्देश्यप्राप्तये पाठ्यक्रमोऽयं सफलो भविष्यतीत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चमाध्यमिकशिक्षाया आधारो निर्मास्यते इति चापेक्षितं वर्तते ।

पाठचक्रमेऽस्मिन् निर्धारितविषयाणामध्ययनेनच्छात्राः विषयबोधपूर्वकं भावसौन्दर्यसंवलितं पद्यकाव्यार्थगौरवम्, विविधज्ञानभरितां शब्दचमत्कृतियुतां गद्यकाव्यगतार्थदीप्तिम्, नीतिचेतनानिदर्शकं रूपकमाधुर्यं,

मौलिकमूल्यमान्यताराष्ट्रियताभरितं प्रबन्धलालित्यं, प्रेरणास्पदं कथाबन्धं च ज्ञात्वा तदनुकूलमाचरितुं, सुचरितमनुकर्तुं, तदनुरूपं मौलिकमूल्यमान्यतराष्ट्रियतादिगौरवं साधयितुं, व्यवहारानुरूपं काव्यप्रयोजनं व्याख्यातुञ्च समर्था भवन्ति । पाठ्यक्रमस्थानां रसच्छन्दोऽलङ्कारादिकाव्यशास्त्रीयविषयाणामवगत्या विद्यार्थिनो रसच्छन्दोऽलङ्कारादीनां प्रयोगेण निर्दुष्टकाव्यरचनायां काव्यगतानां तत्तद्विषयाणामनुशीलनेन काव्यसमीक्षणे च प्रवर्तन्ते । परिचयम्, स्तरगतक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोऽसौ विकासं नीतोऽस्ति । संस्कृतकाव्यस्य वैशिष्ट्येन सामान्यपरिचयेण पाठ्यक्रमविकासस्य विषयगतौचित्येन च साकं, पाठ्यक्रमे विद्यमानानां मुख्यविशेषतानां पाठ्यक्रमस्वरूपस्य च संयोजनेनात्र प्रथमं परिचय उपस्थापितोऽस्ति । ततो विषयगतरूपेणापेक्षितानां ज्ञान-शिल्पाभिवृत्ति-मूल्य-कार्यतत्परतानां संयोजनेन क्रियात्मकस्वरूपे स्तरगतक्षमता उल्लिखिताः सन्ति, पुनः स्तरगतक्षमतानां विशिष्टीकृतविस्तृत्या कक्षागतशिक्षणोपलब्धयो विकसिताः सन्ति, तदनु पूर्वकक्षाभिः सह लम्बीयसन्तोलनस्याधारेण विषयवस्तुनः क्षेत्रक्रमौ निर्दिष्टौ स्तः । तदनन्तरमत्र विषयगतविशिष्टतां मौलिकतां च संयोज्य शिक्षणसहजीकरणस्य विधिप्रक्रिये प्रदर्शिते स्तः । अन्त्ये निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितमस्ति ।

## २. विषयानुगताः क्षमताः

**माध्यमिकस्तरे ९-१० कक्षयोरैच्छिकसंस्कृतसाहित्यविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

१. गद्यकाव्य-पद्यकाव्य-नाटक-प्रबन्ध-कथानां स्वरूपविमर्शने

२. निर्दिष्टानां काव्यांशानां बोधेऽभिव्यक्तौ च

३. राष्ट्र-समाज-भाषासंस्कृति-प्रकृति-मानवताप्रभृत्यनेकमूल्यवत्सु विषयेषु स्वानुभूतिमाधृत्य गद्यपद्यकाव्यरचनाभ्यासप्रवृत्तौ

४. अधीतानामनुभूतानाञ्च विषयाणां व्याख्यान-सारांशप्रकाशनानुशीलनकौशलार्जने

५. पाठगतसन्दर्भप्रसङ्गाकलनानुमानचरित्रपरिवेशानामभिज्ञाने तदभिव्यक्तौ च

६. साहित्यिकशब्दभाण्डागारवृद्धौ रचनात्मकसमीक्षात्मकप्रतिभयोर्विकासे च

७. काव्यात्मभूतस्य रसतोवस्य, काव्यसौन्दर्याधायकयोश्छन्दोऽलङ्कारयोः सभेदं परिचयप्रदाने

८. निर्दिष्टानां रसच्छन्दोऽलङ्काराणां लक्षणादिविमर्शने

९. अधीतरसच्छन्दोद्रलङ्काराणामाधारेण काव्यसमीक्षणे

## ३. कक्षागतशिक्षणोपलब्धिः

कक्षा ९

श्रवणं भाषणञ्च

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. छन्दोलक्षणादिकं श्रुत्वा | १.१. लक्षणं श्रुत्वा पद्यस्वरूपं कथयितुम्, |

| | |
|---|---|
| तेषामुच्चारणं कर्तुम् | १.२. वार्णिक-मात्रिकवृत्तयोर्लक्षणं श्रुत्वा वार्णिकमात्रिकवृत्तयोः पार्थक्यं वक्तुम्<br>१.३. लघुगुर्वाद्यक्षरपरिचयश्रवणेन पद्यादिषु वर्तमानानि लघुगुर्वाद्यक्षराणि अभिज्ञाय कथयितुम्<br>१.४. निर्दिष्टच्छन्दसां लक्षणोदाहरणानि श्रुत्वा सलयं तेषामनुवाचनं कर्तुम् |
| २. अलङ्कारादीनां परिचयं सम्यक् श्रुत्वा शुद्धतयोच्चारणं कर्तुम् | २.१. अलङ्कारपरिचयं श्रुत्वा तत्स्वरूपं वर्णयितुम्<br>२.२. शब्दार्थालङ्कारयोः स्वरूपं श्रुत्वा स्फुटतया तयोः पार्थक्यं निगदितुम्<br>२.३. निर्दिष्टालङ्काराणां लक्षणं श्रुत्वा तेषां स्वरूपमाख्यातुम्<br>२.४. निर्दिष्टालङ्काराणामुदाहरणान्यनुवाचयितुम् |
| ३. महाकाव्यांशानाकर्ण्य तान् तदर्थादींश्च सम्यगाख्यातुम् | ३.१. कालिदासाश्वघोषयोः वैशिष्ट्यसहितं परिचयं श्रुत्वा स्वभाषया प्रस्तोतुम्<br>३.२. महाकाव्ययोर्निर्दिष्टपद्यानां श्रवणमनु सलयं तेषां वाचनं कर्तुम्<br>३.३. निर्दिष्टपद्यानां विश्लेषणं श्रुत्वा स्वभाषया तदर्थं कथयितुम् |
| ४. गद्यकाव्यांशानां सम्यक् श्रवणेन तेषां शुद्धमुच्चारणं कृत्वा तदर्थादिकं कथयितुम् | ४.१. सुबन्धु-अम्बिकादत्तव्यासयोः परिचयं श्रुत्वा तद्वैशिष्ट्यानि कथयितुम्<br>४.२. गद्यकाव्ययोर्निर्दिष्टांशानां श्रवणं कृत्वा शुद्धतया तेषामनुवाचनं कर्तुम्<br>४.३. निर्दिष्टगद्यांशानां सन्दर्भादिसहितं विवेचनं श्रुत्वा तदभिप्रायं प्रकटयितुम्<br>४.४. गद्यांशसम्बद्धान् प्रश्नान् श्रुत्वा तदुत्तराणि कथयितुम् |
| ५. नाट्यांशानाकर्ण्य तत्सन्देशं निगदितुम् | ५.१. नाट्यांशानां सम्यक् श्रवणं कृत्वा साभिनयमनुवाचनं विधातुम्<br>५.२. नाटकस्य विश्लेषणं श्रुत्वा तस्य प्रेरकं सन्देशं श्रावयितुम्<br>५.३. मौखिकरूपेण नाटकस्य पात्राणां चारित्रिकं वैशिष्ट्यं प्रकटयितुम्<br>५.४. नाटकसम्बद्धप्रश्नानामुत्तराणि कथयितुम् |
| ६. प्रबन्धं श्रुत्वा तद्गतविषयान् वर्णयितुम् | ६.१. प्रबन्धस्य शुद्धतयाऽनुवाचनं कर्तुम्<br>६.२. प्रबन्धस्य विश्लेषणं श्रुत्वा तद्वर्णितविषयान् कथयितुम्<br>६.३. प्रबन्धसम्बद्धप्रश्नानामुत्तराणि कथयितुम् |
| ७. कथायाः सम्यक्छ्रवणानन्तरं तत्सन्देशं कथयितुम् | ७.१. कथायाः शुद्धोच्चारणं कर्तुम्<br>७.२. कथाया विश्लेषणश्रवणेन तत्सन्देशमाख्यातुम्<br>७.३. कथायाः पात्राणां चरित्रात् प्रेरकपक्षं निगदितुम्<br>७.४. कथासम्बद्धप्रश्नानामुत्तराणि कथयितुम् |
| ८. जीवन्याः श्रवणं कृत्वा प्रेरकपक्षान् भाषितुम् | ८.१. जीवनीपाठं शुद्धतयाद्रनूच्चारयितुम्<br>८.२. जीवन्या विश्लेषणं श्रुत्वा तद्गतप्रेरकपक्षान् प्रकटयितुम् |

| | |
|---|---|
| | ८.३. जीवनीपात्रस्य प्रमुखकार्याणि श्रावयितुम्<br>८.४. जीवनीसम्बद्धप्रश्नानामुत्तराणि कथयितुम् |

पठनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. लक्ष्यलक्षणसमन्वयप्रकारबोध-पूर्वकं छन्दोलक्षणादीन् पठितुम् | १.१. पद्यलक्षणं पठित्वा पद्यं परिचेतुम्<br>१.२. वार्णिकमात्रिकवृत्तयोः पार्थक्यबोधेन वार्णिक-मात्रिकवृत्तयोर्लक्षणं पठितुम्<br>१.३. लघुगुर्वाद्यक्षरपरिचयं पठित्वा लघुगुर्वाद्यक्षराणि अभिज्ञातुम्<br>१.४. सगणपरिचयं निर्दिष्टच्छन्दसां लक्षणानि पठित्वा लक्ष्यलक्षणसमन्वयं कर्तुम्<br>१.५. अधीतच्छन्दसामन्यान्युदाहरणानि सलयं पठितुम् |
| २. साभिप्रायमलङ्कारलक्षणादिकं पठितुम् | २.१. अलङ्कारलक्षणमध्येतुम्<br>२.२. शब्दार्थालङ्कारयोः पार्थक्यबोधं कृत्वा तयोः परिचयं पठितुम्<br>२.३. तोव-स्वरूपादीनां विमर्शेन निर्दिष्टालङ्काराणां लक्षणं पठितुम्<br>२.४. निर्दिष्टालङ्काराणमुदाहरणानि पठित्वा लक्षणे समन्वयं कर्तुम् |
| ३. भावार्थबोधपुरःसरं महाकाव्यांशान् पठितुम् | ३.१. कालिदासाश्वघोषयोः काव्यगतवैशिष्ट्यबोधेन तयोः परिचयं पठितुम्<br>३.२. सन्दर्भान्वय-पदार्थ-व्याकरण-समासबोधपूर्वकं महाकाव्ययोर्निर्दिष्टपद्यानि पठितुम् |
| ४. तात्पर्यबोधं कृत्वा गद्यकाव्यांशान् पठितुम् | ४.१. वैशिष्ट्यावबोधपूर्वकं सुबन्धु-अम्बिकादत्तव्यासयोः परिचयं पठितुम्<br>४.२. गद्यकाव्ययोर्निर्दिष्टांशानां सन्दर्भादिज्ञानपुरःसरं व्याख्यानं पठितुम् |
| ५. ससन्देशज्ञानं नाटकं पठितुम् | ५.१. साभिनयं नाट्यांशानां पठनं कर्तुम्<br>५.२. पात्राणां चारित्रिकवैशिष्ट्यावबोधपूर्वकं नाटकस्याध्ययनं कर्तुम्<br>५.३. सन्देशबोधेन सविश्लेषणं नाटकमध्येतुम् |
| ६. साभिप्रायबोधं प्रबन्धाध्ययनं कर्तुम् | ६.१. सार्थबोधं शुद्धतया प्रबन्धं पठितुम्<br>६.२. वर्णितविषयबोधपूर्वकं प्रबन्धस्य मौनाध्ययनं कर्तुम् |
| ७. सन्देशबोधेन कथाया अध्ययनं विधातुम् | ७.१. पदार्थबोधसहितं शुद्धतया कथां पठितुम्<br>७.२. प्रेरकसन्देशबोधपुरःसरं कथां सम्यगध्येतुम्<br>७.३. कथां सम्यगधीत्य पात्राणां चरित्रात् प्रेरकपक्षं ग्रहीतुम् |
| ८. जीवन्याः श्रवणं कृत्वा | ८.१. अर्थं बुद्ध्वा शुद्धतया जीवनीपाठं पठितुम् |

| | |
|---|---|
| प्रेरकपक्षान् भाषितुम् | ८.२. प्रेरकपक्षग्रहणपूर्वकं सम्यग् जीवनीपाठस्य मौनाध्ययनं कर्तुम् |

लेखनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. ससमन्वयं छन्दःपरिचयादीन् लेखितुम् | १.१. सोदाहरणं पद्यलक्षणं लेखितुम्<br>१.२. विन्दुगतरूपेण वार्णिकमात्रिकवृत्तयोः पार्थक्यं प्रस्तोतुम्<br>१.३. सोदाहरणं गणपरिचयं प्रदर्शयितुम्<br>१.४. निर्दिष्टच्छन्दसामुदाहरणपद्यानां गणप्रदर्शनपूर्वकं लक्षणे समन्वयं कर्तुम्<br>१.५. अधीतच्छन्दसामन्यान्युदाहरणानि अन्विष्य ससमन्वयं प्रदर्शयितुम्<br>१.६. अधीतच्छन्दसां प्रयोगेण मौलिकपद्यरचनाभ्यासं कर्तुम् |
| २. तlववमर्शनपूर्वकं सोदाहरणमलङ्कारादिलक्षणं प्रदर्शयितुम् | २.१. अलङ्कारत्वाधानपुरःसरमलङ्कारस्य परिचयं लेखितुम्<br>२.२. शब्दार्थालङ्कारयोः पार्थक्यबोधिकां तालिकां निर्मातुम्<br>२.३. तlववमर्शनेन निर्दिष्टालङ्काराणां लक्षणस्योदाहरणे समन्वयं प्रदर्शयितुम्<br>२.४. अधीतालङ्काराणामुदाहरणान्तरान्वेषणं विधाय तlववमर्शनपूर्वकं लक्षणसमन्वयं कर्तुम्<br>२.५. अधीतालङ्काराणां प्रयोगेण गद्यपद्यरचनाभ्यासं विधातुम् |
| ३. महाकाव्यांशानां सन्दर्भ-भावार्थादिप्रदर्शनपूर्वकं सप्रसङ्गं व्याख्यां कर्तुम् | ३.१. काव्यगतवैशिष्ट्यसहितं कालिदासाश्वघोषयोः परिचयं लिखितुम्<br>३.२.सन्दर्भान्वय-पदार्थ-समास-व्याकरण-च्छन्दोऽलङ्काराद्युल्लेखनपूर्वकं महाकाव्ययोर्निर्दिष्टपद्यानां व्याख्यां कर्तुम्<br>३.३. महाकाव्ययोर्निर्दिष्टपद्यानां भावार्थं प्रकाशयितुम्<br>३.४. निर्दिष्टमहाकाव्यवर्णितविषयाणां गद्यात्मकरूपेण स्वभाषया लेखितुम्<br>३.५. महाकाव्यांशसारानुशीलनेनानुच्छेदं रचयितुम् |
| ४. निर्दिष्टगद्यांशानां सन्दर्भादिप्रदर्शनेनाभिप्रायं प्रदर्शयितुम् | ४.१. वैशिष्ट्योल्लेखपूर्वकं सुबन्धु-अम्बिकादत्तव्यासयोः परिचयं लेखितुम्<br>४.२. गद्यकाव्ययोर्निर्दिष्टांशानां सन्दर्भादिप्रदर्शन-पुरःसरं व्याख्यानं कर्तुम्<br>४.३. निर्दिष्टगद्यांशानां तात्पर्योल्लेखनं कर्तुम्<br>४.४. गद्यांशानां सारमाधृत्यानुच्छेदं रचयितुम्<br>४.५. गद्यांशेभ्यो व्यावहारिकपदवाक्यानां गवेषणं कृत्वा सूचीं निर्मातुम् |
| ५. पात्राणां चारित्रिकवैशिष्ट्यं प्रदर्श्य | ५.१. नाटकस्य विषयवस्तु आधृत्य पात्राणां चरित्रचित्रणं कर्तुम् |

| | |
|---|---|
| नाटकसन्देशं प्रकाशयितुम् | ५.२. नाटकात् प्राप्तव्यसन्देशमवलम्ब्यानुच्छेदं रचयितुम्<br>५.३. नाटके प्रयुक्तानां व्यावहारिकाणां पदवाक्यानामन्वेषणेन सूचीं निर्मातुम्<br>५.४. अभिनेयताया दृष्ट्या नाटकस्य विवेचनं कर्तुम् |
| ६. प्रबन्धस्याभिप्रायं प्रदर्शयितुम् | ६.१. प्रबन्धवर्णितविषयान् स्वभाषया लेखितुम्<br>६.२. अभिप्रायमनुसृत्य प्रबन्धस्य निष्कर्षणं कर्तुम्<br>६.३. विषयं लेखनशैलीं चाधृत्य निबन्धस्य विवेचनं विधातुम्<br>६.४. स्वानुभूतविषयानवलम्ब्य प्रबन्धं रचयितुम् |
| ७. कथायाः प्रेरकपक्षानुद्घाट्य सन्देशविमर्शनं कर्तुम् | ७.१. कथायाः पात्राणां चरित्रेभ्यः प्रेरकपक्षानुद्घाट्य पात्राणां चरित्रचित्रणं कर्तुम्<br>७.२. कथायाः सन्देशमवलम्ब्यानुच्छेदं रचयितुम्<br>७.३. तoवानां सन्देशस्य च दृष्ट्या कथाया विश्लेषणं विधातुम् |
| ८. जीवन्या विवेचनं कर्तुम् | ८.१. यस्य जीवनी वर्तते, तस्य प्रमुखकार्याणां सूचीं निर्मातुम्<br>८.२. प्रमुखकार्याधारे तद्योगदानानि वर्णयितुम्<br>८.३. जीवनीतो ग्रहणीयपक्षानुद्घाट्यानुच्छेदं रचयितुम्<br>८.४. सूत्राणि दृष्ट्वा जीवनीं लेखितुम् |

कक्षा १०

श्रवणं भाषणञ्च

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. छन्दोलक्षणादिकं श्रुत्वा तेषामुच्चारणं कर्तुम् | १.१. निर्दिष्टच्छन्दसां लक्षणं श्रुत्वाऽनुवाचनं कर्तुम्<br>१.२. निर्दिष्टच्छन्दसामुदाहरणानि सलयं वाचयितुम् |
| २. रसानां रससहकारितoवानां च परिचयं सम्यक् श्रुत्वा शुद्धतयोच्चारणं कर्तुम् | २.१. रसपरिचयं श्रुत्वा तत्स्वरूपं वर्णयितुम्<br>२.२. रससहकारिणां विभावानुभावव्यभिचारिभावानां सामान्यं परिचयं भाषितुम्<br>२.३. स्थायिभावानां नामानि श्रुत्वा रसानुरूपं क्रमेण तेषां नामानि कथयितुम्<br>२.४. शृङ्गारादीनां नवानां रसानां लक्षणं श्रुत्वा तेषां स्वरूपमाख्यातुम्<br>२.५. शृङ्गारादीनां रसानामुदाहरणान्यनुवाचयितुम् |
| ३. महाकाव्यांशानाकर्ण्य तान् तदर्थादींश्च सम्यगाख्यातुम् | ३.१. कालिदास-सुकृतिदत्तपन्तयोर्वैशिष्ट्यसहितं परिचयं श्रुत्वा स्वभाषया प्रस्तोतुम् |

| | |
|---|---|
| | ३.२. महाकाव्ययोर्निर्दिष्टपद्यानां श्रवणमनु सलयं तेषां वाचनं कर्तुम्<br>३.३. निर्दिष्टपद्यानां विश्लेषणं श्रुत्वा स्वभाषया तदर्थं कथयितुम् |
| ४. गद्यकाव्यांशानां सम्यक् श्रवणेन तेषां शुद्धमुच्चारणं कृत्वा तदर्थादिकं कथयितुम् | ४.१. बल्लालकवि-वाणभट्टयोः परिचयं श्रुत्वा तद्वैशिष्ट्यानि कथयितुम्<br>४.२. गद्यकाव्ययोर्निर्दिष्टांशानां श्रवणं कृत्वा शुद्धतया तेषामनुवाचनं कर्तुम्<br>४.३. निर्दिष्टगद्यांशानां सन्दर्भादिसहितं विवेचनं श्रुत्वा तदभिप्रायं प्रकटयितुम्<br>४.४. गद्यांशसम्बद्धान् प्रश्नान् श्रुत्वा तदुत्तराणि कथयितुम् |
| ५. नाट्यांशानाकर्ण्य तत्सन्देशं निगदितुम् | ५.१. नाट्यांशानां सम्यक् श्रवणं कृत्वा साभिनयमनुवाचनं विधातुम्<br>५.२. नाटकस्य विश्लेषणं श्रुत्वा तस्य प्रेरकं सन्देशं श्रावयितुम्<br>५.३. मौखिकरूपेण नाटकस्य पात्राणां चारित्रिकं वैशिष्ट्यं प्रकटयितुम्<br>५.४. नाटकसम्बद्धप्रश्नानामुत्तराणि कथयितुम् |
| ६. प्रबन्धं श्रुत्वा तद्गतविषयान् वर्णयितुम् | ६.१. प्रबन्धस्य शुद्धतयाऽनुवाचनं कर्तुम्<br>६.२. प्रबन्धस्य विश्लेषणं श्रुत्वा तद्वर्णितविषयान् कथयितुम्<br>६.३. प्रबन्धसम्बद्धप्रश्नानामुत्तराणि कथयितुम् |
| ७. कथायाः सम्यक्छ्रवणानन्तरं तत्सन्देशं कथयितुम् | ७.१. कथायाः शुद्धोच्चारणं कर्तुम्<br>७.२. कथाया विश्लेषणश्रवणेन तत्सन्देशमाख्यातुम्<br>७.३. कथायाः पात्राणां चरित्रात् प्रेरकपक्षं निगदितुम्<br>७.४. कथासम्बद्धप्रश्नानामुत्तराणि कथयितुम् |
| ८. जीवन्याः श्रवणं कृत्वा प्रेरकपक्षान् भाषितुम् | ८.१. जीवनीपाठं शुद्धतयाद्रनूच्चारयितुम्<br>८.२. जीवन्या विश्लेषणं श्रुत्वा तद्गतप्रेरकपक्षान् प्रकटयितुम्<br>८.३. जीवनीपात्रस्य प्रमुखकार्याणि श्रावयितुम्<br>८.४. जीवनीसम्बद्धप्रश्नानामुत्तराणि कथयितुम् |

पठनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. लक्ष्यलक्षणसमन्वयप्रकारबोध-पूर्वकं छन्दोलक्षणादीन् पठितुम् | १.१. सगणपरिचयं निर्दिष्टच्छन्दसां लक्षणानि पठित्वा लक्ष्यलक्षणसमन्वयं कर्तुम्<br>१.२. अधीतच्छन्दसामन्यान्युदाहरणानि सलयं पठितुम् |
| २. रसानां रससहकारितोवानां च | २.१. रसपरिचयं पठित्वा तत्स्वरूपं वर्णयितुम् |

| | |
|---|---|
| स्वरूपप्रकारादिकं पठितुम् | २.२. रससहकारिणां विभावानुभावव्यभिचारिभावानां सामान्यं परिचयं पठितुम्<br>२.३. रसानुरूपं स्थायिभावानां नामानि पठितुम्<br>२.४. स्वरूपबोधपूर्वकं शृङ्गारादीनां नवानां रसानां लक्षणं पठितुम्<br>२.५. विभावादीनां विचारेण शृङ्गारादीनां रसानामुदाहरणानि पठितुम् |
| ३. भावार्थबोधपुरःसरं महाकाव्यांशान् पठितुम् | ३.१. कालिदास-सुकृतिदत्तपन्तयोः काव्यगतवैशिष्ट्यबोधेन तयोः परिचयं पठितुम्<br>३.२.सन्दर्भान्वय-पदार्थ-व्याकरण-समासबोधपूर्वकं महाकाव्ययोर्निर्दिष्टपद्यानि पठितुम् |
| ४. तात्पर्यबोधं कृत्वा गद्यकाव्यांशान् पठितुम् | ४.१. वैशिष्ट्यावबोधपूर्वकं बल्लालकवि-वाणभट्टयोः परिचयं पठितुम्<br>४.२. गद्यकाव्ययोर्निर्दिष्टांशानां सन्दर्भादिज्ञानपुरःसरं व्याख्यानं पठितुम् |
| ५. ससन्देशज्ञानं नाटकं पठितुम् | ५.१. साभिनयं नाट्यांशानां पठनं कर्तुम्<br>५.२. पात्राणां चारित्रिकवैशिष्ट्यावबोधपूर्वकं नाटकस्याध्ययनं कर्तुम्<br>५.३. सन्देशबोधेन सविश्लेषणं नाटकमध्येतुम् |
| ६. साभिप्रायबोधं प्रबन्धाध्ययनं कर्तुम् | ६.१. सार्थबोधं शुद्धतया प्रबन्धं पठितुम्<br>६.२. वर्णितविषयबोधपूर्वकं प्रबन्धस्य मौनाध्ययनं कर्तुम् |
| ७. सन्देशबोधेन कथाया अध्ययनं विधातुम् | ७.१. पदार्थबोधसहितं शुद्धतया कथां पठितुम्<br>७.२. प्रेरकसन्देशबोधपुरःसरं कथां सम्यगध्येतुम्<br>७.३. कथां सम्यगधीत्य पात्राणां चरित्रात् प्रेरकपक्षं ग्रहीतुम् |
| ८. जीवन्याः श्रवणं कृत्वा प्रेरकपक्षान् भाषितुम् | ८.१. अर्थं बुद्ध्वा शुद्धतया जीवनीपाठं पठितुम्<br>८.२. प्रेरकपक्षग्रहणपूर्वकं सम्यग् जीवनीपाठस्य मौनाध्ययनं कर्तुम् |

लेखनम्

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. ससमन्वयं छन्दःपरिचयादीन् लेखितुम् | १.१. निर्दिष्टच्छन्दसां लक्षणोदाहरणानि प्रस्तोतुम्<br>१.२. निर्दिष्टच्छन्दसामुदाहरणपद्यानां गणप्रदर्शनपूर्वकं लक्षणे समन्वयं कर्तुम्<br>१.३. अधीतच्छन्दसामन्यान्युदाहरणानि अन्विष्य ससमन्वयं प्रदर्शयितुम्<br>१.४. अधीतच्छन्दसां प्रयोगेण मौलिकपद्यरचनाभ्यासं कर्तुम् |
| २. तोविवमर्शनपूर्वकं सोदाहरणं | २.१. रसत्वाधानपुरःसरं रसस्य परिचयं लेखितुम् |

| | |
|---|---|
| रसानां लक्षणं प्रदर्शयितुम् | २.२. विभावानुभावयोः सामान्यपरिचयं प्रदर्शयितुम्<br>२.३. व्यभिचारिभावस्य परिचयं प्रदाय त्रयस्त्रिंशतो व्यभिचारिभावानां सार्थं नामानि उल्लेखितुम्<br>२.४. रसानुरूपं स्थयिभावानां नामानि क्रमेण लेखितुम्<br>२.५. तोववमर्शनेन शृङ्गारादीनां रसानां स्वरूपं वर्णयित्वा तेषामुदाहरणानि प्रस्तोतुम्, लक्षणे उदाहरणस्य समन्वयं प्रदर्शयितुञ्च<br>२.६. रसानामुदाहरणान्तरान्वेषणं विधाय तोववमर्शनपूर्वकं लक्षणसमन्वयं कर्तुम्<br>२.७. रसानां प्रयोगेण गद्यपद्यरचनाभ्यासं विधातुम् |
| ३. महाकाव्यांशानां सन्दर्भ-भावार्थादिप्रदर्शनपूर्वकं सप्रसङ्गं व्याख्यां कर्तुम् | ३.१. काव्यगतवैशिष्ट्यसहितं कालिदास-सुकृतिदत्तपन्तयोः परिचयं लिखितुम्<br>३.२.सन्दर्भान्वय-पदार्थ-समास-व्याकरण-च्छन्दोऽलङ्काराद्युल्लेखनपूर्वकं महाकाव्ययोर्निर्दिष्टपद्यानां व्याख्यां कर्तुम्<br>३.३. महाकाव्ययोर्निर्दिष्टपद्यानां भावार्थं प्रकाशयितुम्<br>३.४. निर्दिष्टमहाकाव्यवर्णितविषयाणां गद्यात्मकरूपेण स्वभाषया लेखितुम्<br>३.५. महाकाव्यांशसारानुशीलनेनानुच्छेदं रचयितुम् |
| ४. निर्दिष्टगद्यांशानां सन्दर्भादिप्रदर्शनेनाभिप्रायं प्रदर्शयितुम् | ४.१. वैशिष्ट्योल्लेखपूर्वकं बल्लालकवि-वाणभट्टयोः परिचयं लेखितुम्<br>४.२. गद्यकाव्ययोर्निर्दिष्टांशानां सन्दर्भादिप्रदर्शन-पुरःसरं व्याख्यानं कर्तुम्<br>४.३. निर्दिष्टगद्यांशानां तात्पर्योल्लेखनं कर्तुम्<br>४.४. गद्यांशानां सारमाधृत्यानुच्छेदं रचयितुम्<br>४.५. गद्यांशेभ्यो व्यावहारिकपदवाक्यानां गवेषणं कृत्वा सूचीं निर्मातुम् |
| ५. पात्राणां चारित्रिकवैशिष्ट्यं प्रदर्श्य नाटकसन्देशं प्रकाशयितुम् | ५.१. नाटकस्य विषयवस्तु आधृत्य पात्राणां चरित्रचित्रणं कर्तुम्<br>५.२. नाटकात् प्राप्तव्यसन्देशमवलम्ब्यानुच्छेदं रचयितुम्<br>५.३. नाटके प्रयुक्तानां व्यावहारिकाणां पदवाक्यानामन्वेषणेन सूचीं निर्मातुम्<br>५.४. अभिनेयताया दृष्ट्या नाटकस्य विवेचनं कर्तुम् |
| ६. प्रबन्धस्याभिप्रायं प्रदर्शयितुम् | ६.१. प्रबन्धवर्णितविषयान् स्वभाषया लेखितुम्<br>६.२. अभिप्रायमनुसृत्य प्रबन्धस्य निष्कर्षणं कर्तुम्<br>६.३. विषयं लेखनशैलीं चाधृत्य निबन्धस्य विवेचनं विधातुम्<br>६.२. स्वानुभूतविषयानवलम्ब्य प्रबन्धं रचयितुम् |
| ७. कथायाः प्रेरकपक्षानुद्घाट्य | ७.१. कथायाः पात्राणां चरित्रेभ्यः प्रेरकपक्षानुद्घाट्य पात्राणां चरित्रचित्रणं |

| | |
|---|---|
| सन्देशविमर्शनं कर्तुम् | कर्तुम्<br>७.२. कथायाः सन्देशमवलम्ब्यानुच्छेदं रचयितुम्<br>७.३. तोवानां सन्देशस्य च दृष्ट्या कथाया विश्लेषणं विधातुम् |
| ८. जीवन्या विवेचनं कर्तुम् | ८.१. यस्य जीवनी वर्तते, तस्य प्रमुखकार्याणां सूचीं निर्मातुम्<br>८.२. प्रमुखकार्याधारे तद्योगदानानि वर्णयितुम्<br>८.३. जीवनीतो ग्रहणीयपक्षानुद्घाट्यानुच्छेदं रचयितुम्<br>८.४. सूत्राणि दृष्ट्वा जीवनीं लेखितुम् |

## ४. विषयक्षेत्रं क्रमश्च

### कक्षा ९

| क्र.सं | विषयः | प्रकरणम् | पाठ्यांशविवरणम् | बोधः | अभिव्यक्तिः | पाठ्यविषया-नुशीलनम् | कार्य-घण्टाः |
|---|---|---|---|---|---|---|---|
| १ | काव्य-शास्त्रम् | छन्दः | पद्यलक्षणम्, जाति-वृत्ताख्ययोः पद्यभेदयोः परिचयः, सम-अर्धसम-विषमाख्यानां वृत्तभेदानां परिचयः, ह्रस्वदीर्घवर्णाभिज्ञानम्, लघुगुरुपरिचयः, ह्रस्वानां गुरुभावावस्था, सभेदं गणपरिचयः, यतिपरिचयः<br>अनुष्टुप्, आर्या, प्रमाणिका, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, इन्दिरा, वंशस्थम्, भुजङ्गप्रयातम्, तोटकम्, स्रग्विणी, द्रुतविलम्बितम् इत्येतेषां छन्दसां ससमन्वयं लक्षणोदाहरणानि | पद्यलक्षणबोधः,<br>वार्णिकमात्रिक-वृत्तयोः पार्थक्यबोधः,<br>वृत्तभेदबोधः,<br>ह्रस्व-दीर्घ-लघु-गुरु-वर्णबोधः,<br>गणपरिचयबोधः<br>निर्दिष्टच्छन्दसां लक्षणोदाहरणबोधः,<br>अधीतच्छन्दसां पद्यानां लक्ष्यलक्षणसमन्वय-बोधः | पद्यस्वरूपकथनम्,<br>वार्णिकमात्रिक-वृत्तयोः पार्थक्य-विमर्शनम्,<br>समादिवृत्तस्वरूप-कथनम्,<br>पद्यादिषु वर्तमानानामक्षराणां लघुगुर्वाद्यभिज्ञानम्,<br>निर्दिष्टच्छन्दसां लक्षणोदाहरणप्रकटनम् | समानाक्षरयुतानां वृत्तानां वर्गीकरणम्,<br>अधीतलक्षणानां वृत्तानामुदाहरणान्तरान्वेषणम्,<br>पद्यावलोकनेन जातिवृत्तयोः समादिवृत्त-भेदानाञ्चाभिज्ञानम्,<br>अधीतच्छन्दसां पद्यानि दृष्ट्वा छन्दोऽभिज्ञानम्,<br>अधीतच्छन्दःसु मौलिकपद्य-रचनाभ्यासः | ८ |
| २ | काव्य-शास्त्रम् | अलङ्कारः | अलङ्कारस्वरूपम्, अलङ्कारभेदपरिचयः,<br>अनुप्रासः, यमकम्, स्वभावोक्तिः, उपमा, रूपकम्, उत्प्रेक्षा, अर्थान्तरन्यासः, निदर्शना, दृष्टान्तः, दीपकम् इत्येषामलङ्काराणां तात्त्विकविमर्शनपूर्वकं लक्षणोदाहरणानि | शब्दार्थालङ्कारयो-रन्तरबोधः<br>प्रसिद्धालङ्काराणां लक्षणोदाहरणबोधः | शब्दार्थालङ्कारयोः पार्थक्याभिव्यक्तिः<br>प्रसिद्धालङ्काराणां सोदाहरणं तात्त्विकविमर्शनम् | उदाहरणान्तरेषु शब्दालङ्कारानु-सन्धानम्,<br>उदाहरणान्तरेषु अर्थालङ्कारगवेषणम्,<br>अधीतालङ्काराणां प्रयोगेण | ८ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | गद्यपद्यरचनाभ्यासः | |
| ३ | पद्य-काव्यम् | महाकाव्यांशः | दिलीपवर्णनम्<br>(रघुवंशमहाकाव्यस्य द्वितीयसर्गस्य १-२० श्लोकाः) | महाकाव्यांशबोधः<br>कालिदासपरिचय-विषयकानुच्छेदबोधः रघुवंशमहाकाव्य-वैशिष्ट्यबोधः | पद्यभावार्थप्रकाशनम्, सन्दर्भान्वयनिर्देश-पूर्वकं पर्यायकोश-समासालङ्कारादियुतं व्याख्यानम्,<br>कालिदासस्य तत्काव्यानां च वैशिष्ट्यप्रकाशनम् | महाकाव्यांशेषु छन्दोरसालङ्कारादि-काव्यसौन्दर्यतत्त्व-प्रयोगानुशीलनम्,<br>महाकाव्यांश-सारानुशीलनेन गद्यरचनाभ्यासः | १६ |
| | पद्य-काव्यम् | महाकाव्यांशः | बुद्धजन्म<br>(बुद्धचरितमितिमहाकाव्यस्य प्रथमसर्गस्य बुद्धजन्मप्रसङ्ग-सम्बद्धाः १५ श्लोकाः) | महाकाव्यांशबोधः<br>अश्वघोषपरिचय-विषयकानुच्छेदबोधः बुद्धचरितमहा-काव्यस्य वैशिष्ट्यबोधः | पद्यभावार्थप्रकाशनम्, सन्दर्भान्वयनिर्देश-पूर्वकं पर्यायकोश-समासालङ्कारादियुतं व्याख्यानम्, अश्वघोषस्य तत्काव्यानां च वैशिष्ट्यप्रकाशनम् | महाकाव्यांशेषु छन्दोरसालङ्कारादि-काव्यसौन्दर्यतत्त्व-प्रयोगानुशीलनम्,<br>महाकाव्यांश-सारानुशीलनेन गद्यरचनाभ्यासः | १६ |
| ४ | गद्य-काव्यम् | गद्यकाव्यांशः | सूर्योदयवर्णनम्, सूर्यास्तवर्णनम्, आर्यपरिचयः<br>(शिवराजविजयनाम्नो गद्यकाव्यस्य प्रथमनिःश्वासात् सूर्योदयवर्णनसम्बद्धो गद्यांशः, द्वितीयनिःश्वासाच्च सूर्यास्तवर्णन-आर्यपरिचयसम्बद्धौ गद्यांशौ) | गद्यकाव्यांशबोधः<br>गद्यकाव्यांश-वैशिष्ट्यबोधः<br>अम्बिकादत्तव्यासस्य देशकालकृत्यादिपरिचय-बोधः | गद्यस्य सरलार्थप्रकाशनम् सन्दर्भपर्यायकोश-समाससमन्विता व्याख्या गद्यकाव्यांशस्य परिवेशविमर्शनम् अम्बिकादत्तव्यासपरिचयादिवि षयात् प्रश्ननिर्माणमुत्तर-लेखनञ्च | गद्यांशस्य सन्दर्भप्रसङ्गाद्य-न्वेषणम्<br>गद्यकाव्यांशस्य व्यावहारिकपद-वाक्यानां गवेषणम्,<br>गद्यकाव्यांशस्य शैलीप्रभावा-कलनम्,<br>स्वभाषया गद्यांशतात्पर्य- | ८ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | लेखनाभ्यासः | |
| | गद्य-काव्यम् | गद्यकाव्यांशः | चिन्तामणिनाम्नो भूपतेश्चरितवर्णनम्<br>(वासवदत्तानाम्नो गद्यकाव्यस्य चिन्तामणिवर्णन-सम्बद्धो गद्यांशः) | गद्यकाव्यांशबोधः<br>गद्यकाव्यांश-वैशिष्ट्यबोधः<br>सुबन्धोर्देशकाल-कृत्यादिपरिचयबोधः | गद्यस्य सरलार्थप्रकाशनम्<br>सन्दर्भपर्यायकोश-समाससमन्विता व्याख्या<br>गद्यकाव्यांशस्य परिवेशविमर्शनम्<br>सुबन्धुपरिचयादि-विषयात् प्रश्ननिर्माणमुत्तर-लेखनञ्च | गद्यांशस्य सन्दर्भप्रसङ्गाद्य-न्वेषणम्<br>गद्यकाव्यांशस्य व्यावहारिकपद-वाक्यानां गवेषणम्,<br>गद्यकाव्यांशस्य शैलीप्रभावाकलनम्,<br>स्वभाषया गद्यांशतात्पर्य-लेखनाभ्यासः | १६ |
| ५. | दृश्य-काव्यम् | एकाङ्क-नाटकम् | जनचेतनासम्बद्धं सामाजिकम् | नाटकविषयवस्तुबोधः<br>नाटकसन्देशबोधः<br>नाटककर्तुः सामान्यपरिचयबोधः | नाटकस्य सरलार्थप्रकाशनम्,<br>नाटकस्य तात्पर्यानुशीलनम्, नाटकस्य पात्राणां चरित्रचित्रणम्,<br>नाटकस्य परिवेशविमर्शनम्, नाटकविषयात् प्रश्ननिर्माणमुत्तर-लेखनञ्च । | नाटके नाटकलक्षण-गवेषणम्,<br>नाटके प्रयुक्तानां व्यावहारिकाणां पदवाक्यानां गवेषणम्,<br>अभिनेयताया दृष्ट्या नाटकस्य विश्लेषणम्,<br>नाटकाभिनयः । | ६ |
| ६ | गद्यम् | प्रबन्धः | धर्मसम्बद्ध एकः | प्रबन्धवर्णितविषयबोधः<br>प्रबन्धरचनाशैलीबोधः<br>प्रबन्धस्य निष्कर्षबोधः<br>प्रबन्धकर्तुः | प्रबन्धस्य सरलार्थप्रकाशनम्<br>प्रबन्धस्य निष्कर्षप्रकटनम्<br>प्रबन्धस्य रचनाशैलीविमर्शनम् | गद्यप्रकारदृष्ट्या प्रबन्धसमीक्षणम्,<br>प्रबन्धवर्णितविषय-स्य प्रभावनिरूपणम्,<br>स्वानुभूतविषयेषु | ६ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | सामान्यपरिचयबोधः | प्रबन्धवर्णितविषयात् प्रश्ननिर्माणमुत्तरलेखनञ्च | प्रबन्धरचनाभ्यासः | |
| ७. | गद्यम् | कथा | कर्तव्यबोधिका पौराणिकी | कथाया विषयवस्तुबोधः<br>कथासन्देशबोधः<br>कथाकारस्य सामान्यपरिचयबोधः | कथायाः सरलार्थप्रकाशनम्,<br>कथायाः सन्देशप्रकटनम्,<br>कथायाः पात्राणां चरित्रचित्रणम्,<br>कथायाः परिवेशविमर्शनम्, कथागतविषयात् प्रश्ननिर्माणमुत्तरलेखनञ्च | नाटके प्रयुक्तानां व्यावहारिकाणां पदवाक्यानां गवेषणम्,<br>तoवानां सन्देशस्य च दृष्ट्या कथाया विश्लेषणम्,<br>मनोहारितया कथायाः कथनम् | ६ |
| ८ | गद्यम् | जीवनी | संस्कृतकाव्यस्रष्टृषु कस्यचन | काव्यस्रष्टुर्देश-कालकृत्यादिबोधः<br>समाजे तद्योगदानबोधः<br>तत्काव्यगतवैशिष्ट्यबोधः<br>तज्जीवन्या समाजे प्रभावबोधः | जीवन्याः सरलार्थप्रकाशनम्,<br>काव्यस्रष्टुः काव्यगतवैशिष्ट्य-वर्णनम्,<br>तज्जीवन्या स्वजीवने प्राप्तप्रेरणायाः प्रकटनम्,<br>जीवनीमाधृत्य प्रश्ननिर्माणमुत्तर-लेखनञ्च | संस्कृतसाहित्य-जगति तत्काव्यस्रष्टुः स्थानाकलनम्,<br>विन्दूनाधृत्य कस्यचिदन्यस्य काव्यस्रष्टुर्जीवनीलेखनम्,<br>समाजे तद्योगदानान्वेषणम् | ६ |
| **सैद्धान्तिकाभ्यासः** | | | | | | | **९६** |
| **प्रयोगात्मकाभ्यासः** | | | | | | | **३२** |
| **योगः** | | | | | | | **१२८** |

# कक्षा १०

| क्र.सं | विषयः | प्रकरणम् | पाठ्यांशविवरणम् | बोधः | अभिव्यक्तिः | पाठ्यविषया-नुशीलनम् | कार्य-घण्टाः |
|---|---|---|---|---|---|---|---|
| १ | काव्य-शास्त्रम् | छन्दः | वसन्ततिलकम्, मालिनी, पञ्चचामरम्, शिखरिणी, मन्दाक्रान्ता, शार्दूल-विक्रीडितम्, स्रग्धरा, सुन्दरी इत्येतेषां वृत्तानां ससमन्वयं लक्षणोदाहरणानि । | लक्षणोदाहरणबोधः द्वयोर्वृत्तयोः परस्परं पार्थक्यबोधः<br>पद्यानां छन्दोलक्षण-समन्वयबोधः | लक्षणोदाहरणा-भिव्यक्तिः,<br>द्वयोर्वृत्तयोः परस्परं पार्थक्यविमर्शनम् | समानाक्षरयुतानां वृत्तानां वर्गीकरणम्, अधीतलक्षणानां वृत्तानामुदाहरणा-न्तराणामन्वेषणम्, अधीतछन्दःसु मौलिकपद्य-लेखनाभ्यासः | ६ |
| २ | काव्य-शास्त्रम् | रसः | सभेदं रसपरिचयः रसानुसारिणां स्थायिभावानां परिचयः रससहकारितोवानां विभावानुभाव-व्यभिचारिभावानां परिचयः, सार्थं व्यभिचारिभाव-नामानि, सोदाहरणं शृङ्गारादीनां रसानां सामान्यपरिचयः | रसलक्षणबोधः,<br>रसानां स्थायिभावबोधः,<br>विभावादीनां स्वरूपबोधः,<br>व्यभिचारिभावानामर्थ-बोधः<br>रसानां लक्षणोदाहरण-बोधः | रसलक्षणाभिव्यक्तिः,<br>स्थायिभावानां रसव्यञ्जकत्व-विमर्शनम्,<br>विभावादीनां रसव्यञ्जने सहकारित्वप्रकटनम्,<br>रसानुरूपव्यभिचारि-भावपरिगणनम्,<br>सोदाहरणं शृङ्गारादिरसस्वरूप-विमर्शनम् | काव्येषु रसान्वेषणम्<br>रसानां निवेशनेन काव्यरचनाभ्यासः,<br>रसानामुदाहरणान्तरान्वेषणम् | १२ |
| ३ | पद्य-काव्यम् | महाका-व्यांशः | हिमालयवर्णनम्<br>(कुमारसम्भव-महाकाव्यस्य प्रथमसर्गस्य १-१८ श्लोकाः) | महाकाव्यांशबोधः<br>कालिदासपरिचय-विषयकानुच्छेदबोधः किरातार्जुनीय-महाकाव्यस्य | पद्यभावार्थप्रकाशनम्, सन्दर्भान्वयनिर्देश-पूर्वकं पर्यायकोश-समासालङ्कारादियुतं | छन्दोरसालङ्कारादि-काव्यसौन्दर्यतोव-प्रयोगानुशीलनम् | १६ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | वैशिष्ट्यबोधः | व्याख्यानम् । कालिदासस्य तत्काव्यानाञ्च वैशिष्ट्यप्रकाशनम् | | |
| | पद्य-काव्यम् | महाकाव्यांशः | कृतवीर्य-दत्तात्रेयसंवादः (कार्तवीर्योदयाख्यस्य महाकाव्यस्याष्टमसर्गस्य १-२० श्लोकाः) | महाकाव्यांशबोधः सुकृतिदत्तपन्त-परिचयविषयकानुच्छेदबोधः सुकृतिदत्तपन्तस्य तन्महाकाव्यस्य च वैशिष्ट्यबोधः | पद्यभावार्थप्रकाशनम्, सन्दर्भान्वयनिर्देश-पूर्वकं पर्यायकोश-समासालङ्कारादियुतं व्याख्यानम् सुकृतिदत्तपन्तस्य तत्काव्यस्य च वैशिष्ट्यप्रकाशनम् | छन्दोरसालङ्कारादि-काव्यसौन्दर्यतोव-प्रयोगानुशीलनम् | १६ |
| ४ | गद्य-काव्यम् | गद्यकाव्यांशः | भोजकालिदास-सङ्गमः (भोजप्रबन्धाख्यस्य गद्यकाव्यस्य भोजकालिदास-सङ्गमविषयको गद्यांशः) | गद्यकाव्यांशबोधः गद्यकाव्यांश-वैशिष्ट्यबोधः बल्लालकवेर्देश-कालकृत्यादि-परिचयबोधः | गद्यस्य सरलार्थप्रकाशनम् सन्दर्भपर्यायकोशसमास-समन्विता व्याख्या गद्यकाव्यांशस्य परिवेशविमर्शनम् बल्लालकवि-परिचयाद् गद्यांशवर्णित-विषयाच्च प्रश्ननिर्माणमुत्तर-लेखनञ्च | गद्यांशस्य सन्दर्भप्रसङ्गाद्यन्वेषणम् गद्यकाव्यांशस्य व्यावहारिकपद-वाक्यानां गवेषणम्, गद्यकाव्यांशस्य शैलीप्रभावाकलनम्, स्वभाषया गद्यांशतात्पर्य-लेखनाभ्यासः | ८ |
| | गद्य-काव्यम् | गद्य-काव्यांशः | शुकनासोपदेशः (कादम्बरीनामकस्य गद्यकाव्यस्य कथामुखात् शुकोपदेशसम्बद्धो गद्यांशः) | गद्यकाव्यांशबोधः गद्यकाव्यांश-वैशिष्ट्यबोधः वाणभट्टस्य देशकालकृत्यादि- | गद्यस्य सरलार्थप्रकाशनम् सन्दर्भपर्यायकोशसमास-समन्विता व्याख्या गद्यकाव्यांशस्य परिवेशविमर्शनम् | गद्यांशस्य सन्दर्भप्रसङ्गाद्यन्वेषणम् गद्यकाव्यांशस्य व्यावहारिकपद-वाक्यानां गवेषणम्, गद्यकाव्यांशस्य | १६ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | परिचयबोधः | वाणभट्टस्य परिचयात् निर्दिष्टगद्यांशवर्णित-विषयात् प्रश्ननिर्माणमुत्तर-लेखनञ्च | शैलीप्रभावाकलनम्, स्वभाषया गद्यांशतात्पर्य-लेखनाभ्यासः | |
| ५. | दृश्य-काव्यम् | एकाङ्क-नाटकम् | नीतिसम्बद्धं पौराणिकम् | नाटकविषयवस्तुबोधः नाटकसन्देशबोधः नाटककर्तुः सामान्यपरिचयबोधः | नाटकस्य सरलार्थप्रकाशनम्, नाटकस्य तात्पर्यानुशीलनम्, नाटकस्य पात्राणां चरित्रचित्रणम्, नाटकस्य परिवेशविमर्शनम्, नाटकविषयात् प्रश्ननिर्माणमुत्तर-लेखनञ्च | नाटके नाटकलक्षणगवेषणम्, नाटके प्रयुक्तानां व्यावहारिकाणां पदवाक्यानां गवेषणम्, अभिनेयताया दृष्ट्या नाटकस्य विश्लेषणम्, नाटकाभिनयः | ६ |
| ६ | गद्यम् | प्रबन्धः | राष्ट्रियतासम्बद्ध एकः | प्रबन्धवर्णितविषयबोधः प्रबन्धरचनाशैलीबोधः प्रबन्धस्य निष्कर्षबोधः प्रबन्धकर्तुः सामान्यपरिचयबोधः | प्रबन्धस्य सरलार्थप्रकाशनम्, प्रबन्धस्य निष्कर्षप्रकटनम्, प्रबन्धस्य रचनाशैलीविमर्शनम्, प्रबन्धवर्णितविषयात् प्रश्ननिर्माणमुत्तर-लेखनञ्च | गद्यप्रकारदृष्ट्या प्रबन्धसमीक्षणम्, प्रबन्धवर्णितविषयस्य प्रभावनिरूपणम्, स्वानुभूतविषयेषु प्रबन्धरचनाभ्यासः | ६ |
| ७. | गद्यम् | कथा | विकृतिनिरसनोद्यता सामाजिकी | कथाविषयवस्तुबोधः कथासन्देशबोधः कथाकारस्य सामान्यपरिचयबोधः | कथायाः सरलार्थप्रकाशनम्, कथायाः सन्देशप्रकटनम्, कथायाः पात्राणां चरित्रचित्रणम्, कथायाः परिवेशविमर्शनम्, कथागतविषयात् | नाटके प्रयुक्तानां व्यावहारिकाणां पदवाक्यानां गवेषणम्, तोवानां सन्देशस्य च दृष्ट्या कथाया विश्लेषणम्, मनोहारितया कथायाः कथनम् | ६ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | प्रश्ननिर्माणमुत्तर-लेखनञ्च । | | |
| ८ | गद्यम् | जीवनी | संस्कृतकाव्यशास्त्रिषु कस्यचन | काव्यशास्त्रिणो देशकालकृत्यादिबोधः<br>साहित्ये तद्योगदानबोधः<br>तत्प्रतिपादितकाव्य-सिद्धान्तस्य सामान्यपरिचयबोधः<br>तज्जीवन्याः समाजे प्रभावबोधः | जीवन्याः सरलार्थप्रकाशनम्,<br>तत्प्रतिपादितकाव्य-सिद्धान्तविश्लेषणम्<br>तज्जीवन्या स्वजीवने प्राप्तप्रेरणायाः प्रकटनम्,<br>जीवनीमाधृत्य प्रश्ननिर्माणमुत्तर-लेखनञ्च | संस्कृतसाहित्यजगति तत्काव्यशास्त्रिणः स्थानाकलनम्,<br>विन्दूनाधृत्य कस्यचिदन्यस्य काव्यशास्त्रिणो जीवनीलेखनम्,<br>समाजे तद्योगदानान्वेषणम् | ६ |
| **सैद्धान्तिकाभ्यासः** | | | | | | | ९६ |
| **प्रयोगात्मकाभ्यासः** | | | | | | | ३२ |
| **योगः** | | | | | | | १२८ |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

इमे क्रियाकलापाः सम्भाव्याः सन्ति । एतान् क्रियाकलापान् निदर्शनस्वरूपेण मत्वा अन्येऽपि क्रियाकलापाः सञ्चालयितुं शक्यन्ते ।

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | शिक्षणघण्टाः | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ५ | ➢ विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>➢ साहित्याभिव्यक्तिकौशलविकासाय वैयक्तिक-युगल-समूहगतादि-कक्षागतशिक्षणसहभागिता |
| २. | कक्षाकार्यं परियोजना-कार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | ६ | ➢ श्रवण-भाषण-पठन-लेखनशिल्पविकास-सम्बद्धाः मौखिकी प्रस्तुतिः, प्रश्नोत्तरलेखनं, विषयविमर्शनं तात्पर्यस्फुटीकरणञ्च<br>➢ गृहकार्यं कक्षाकार्यं च<br>➢ गद्यपद्यात्मककृतीनां देशकालगुणदोष-निरूपणपूर्वकं सामान्यसमीक्षाकार्यम्, कृतिकाराणां देशकालकृत्यात्मकपरिचयप्रदानञ्च<br>➢ साहित्याभिव्यक्तिकौशलसम्बद्ध-परियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) बोधः | ६ | ➢ निर्दिष्टपद्ये वृत्तानुशीलनम्<br>➢ निर्दिष्टपद्यस्यान्वयप्रदर्शनम् |
| | | (ख) अभिव्यक्तिः | ७ | ➢ निर्दिष्टवृत्तस्य छन्दोलक्षणपालनपूर्वकं वाचनम्<br>➢ नाटकगतगद्यपद्ययोः साभिनयं वाचनम्<br>➢ महाकाव्यगतनिर्धारितपद्यस्य भावार्थप्रकाशनम्<br>➢ निर्धारितकाव्यस्रष्टृणां परिचयप्रदानपूर्वकं तेषां काव्यवैशिष्ट्याभिव्यञ्जनम्<br>➢ निर्धारिकाव्यादीनां पात्राणां चरित्रचित्रणम्<br>➢ गद्यपद्यरूपकाणां भाषाशैलीगतपार्थक्यविवेचनम्<br>➢ निर्दिष्टगद्यानां तात्पर्यालोचनम्<br>➢ कथानाटकयोः सन्देशसमीक्षणम्<br>➢ जीवनीप्रबन्धयोर्विषयाभिव्यक्तिः<br>➢ प्रदत्ते पद्ये रसप्रकारानुसन्धानम्<br>➢ प्रदत्तलक्षणस्यालङ्कारस्योदाहरणानुशीलनम्<br>➢ नाटकस्याभिनयप्रदर्शनम् |
| ४. | त्रैमासिक-परीक्षा | मौखिकं लिखितं वा | ८ | त्रैमासिकपरीक्षायाः<br>प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | ३२ | |

## ६. शिक्षणसञ्चालनप्रक्रिया

संस्कृतसाहित्यशिक्षणोपक्रमे शिक्षकैर्वार्षिकीं दैनिकीं वा पाठयोजनां निर्माय शिक्षणसहजीकरणं कर्तव्यम् । सोद्देश्यं छात्राणां पाठश्रवणस्य पाठमननस्य पाठ्यविषयान्तर्गतानां विविधपक्षाणां नैसर्गिकप्रतिभया चिन्तनपूर्वकं प्रश्नोत्तरलेखनस्य शिल्पविकासाय शिक्षकैर्दत्तचित्तैः प्रेरणाप्रदैश्च भवितव्यम् । विषयानुसारेण प्रश्नोत्तर-लेखन-विमर्श-तात्पर्यस्फुटीकरणादिकार्येषु पाठ्यविषयाणां पाठ्यवस्तूनां वा प्रकृत्यनुसारेण चिन्तन-मनन-प्रश्नोत्तरलेखनादिकार्येषु च शिक्षकैरेवच्छात्राः प्रेरयितव्याः । गद्यपद्यात्मककृतीनां देशकालगुणदोष-निरूपणपूर्वकं सामान्यसमीक्षाकार्ये, कृतिकाराणां देशकालकृत्यात्मकपरिचयप्रदानकार्ये च सरलसंस्कृतभाषामाध्यमेन शिक्षकैरेवच्छात्राणां सामर्थ्यमुत्पादनीयम् । लक्षणग्रन्थानां पारिभाषिकशब्दप्रयोगं विधाय तेषां लाक्षणिकविषयवस्तुबोधे समन्वये च सोदाहरणं छात्राः प्रशिक्षणीयाः । शिक्षकैः शिक्षणकार्ये यथाविषयं यथावसरञ्च गद्यपद्यात्मककाव्येषु दण्डान्वय-खण्डान्वय-व्युत्पत्तिप्रयोगाऽऽगमन-निगमन-तुलनोदाहरण-कोशाऽनुवादप्रभृतयो विविधाः शिक्षण-विधयोऽवलम्बनीयाः । गद्यकाव्य-पद्यकाव्य-रूपक-लक्षणशास्त्राणां शिक्षणे शिक्षकैः प्रस्तावनारूपेण विषयवस्तूनां सामान्यपरिचयमुद्देश्यकथनं प्रस्तुतिविधिञ्च बोधयित्वा छात्राभ्यस्तत्सम्बद्धं कक्षाकार्यं गृहकार्यञ्च प्रदेयम् । संस्कृतसाहित्यस्य शिक्षणेद्रधोलिखितानामभ्यासप्रधानानां सर्जनात्मकानाञ्च क्रियाकलापानां सम्पादनमावश्यकं भवति -

(क) व्याख्यानविधिः (ख) प्रश्नोत्तरविधिः (ग) प्रदर्शनविधिः (प्रयोगविधिः)
(घ) अवेक्षणविधिः (ङ) अन्तःक्रियात्मकविधिः (च) आगमनविधिः
(छ) निगमनविधिः

**शिक्षणप्रक्रियायाः सम्भाव्याः शिल्पगताः संयुक्तक्रियाकलापाः**

**(क) श्रवणशिक्षणस्य सम्भाव्याः शिल्पगताः संयुक्तक्रियाकलापाः**

- शुद्धाशुद्धगद्यपद्ययोर्वाचनं संश्राव्य शुद्धोच्चारणं निश्चेतुं विद्यार्थिभ्यो निर्देशनम्
- पद्यमुच्चार्य तस्य गण-लय-गति-यतिविषये प्रतिक्रियाप्रकटनाय विद्यार्थिभ्यः प्रेरणाप्रदानम्
- काव्यकाव्यशास्त्रसम्बद्धानां पद्यानामादर्शवाचनं संश्राव्य तदनुरूपं तेषां कण्ठस्थीकरणाय उत्साहप्रदानम्
- गद्य-पद्यविश्लेषणादिविषयान् श्रावयित्वा प्रतिक्रियाभिव्यक्तये प्रेरणम्
- गद्यपद्ययोः प्रेरकमंशं संश्राव्य तस्य पुनरावृत्तये उत्प्रेरणम्
- गद्यपद्यानां विस्तृतघटनां निरूप्य तेषां अभिप्रायाभिव्यक्त्यै प्रेरणम्
- कक्षायां काव्यगोष्ठीं सञ्चाल्य तस्य विवरणकथनाय प्रेरणम्
- पद्यं संश्राव्य तत्रत्यानां छन्दोद्रलङ्कार-रस-भावादिकाव्यतोवानां कथनाय समुत्प्रेरणम्
- लक्षणपद्यं संश्राव्य तस्य लक्ष्यपद्यकथनाय निर्देशनम्

**(ख) सम्भाषणशिक्षणस्य सम्भाव्याः शिल्पगताः संयुक्तक्रियाकलापाः**

- सामूहिकरूपेण गद्यपद्यानामुच्चारणाय निर्देशनम्
- शिक्षकमनुसृत्य गणयतिगतिलयानुरूपं पद्यानां वाचनं कर्तुं विद्यार्थिभ्यः प्रेरणाप्रदानम्
- पाठितानां गद्यपद्यानामभिप्रायप्रकटनाय निर्देशनम्
- काव्य-काव्यशास्त्रकारपरिचयप्रकटनाय समुत्प्रेरणम्
- सूक्त्यर्थवर्णनायोत्प्रेरणम्
- श्लोकस्यान्वय-पर्याय-समासालङ्कारच्छन्दोनामकथनाय निर्देशनम्

- निर्दिष्टमहाकाव्य-गद्यकाव्यवैशिष्ट्यवर्णनायादेशप्रदानम्
- गद्यपद्यगतरसालङ्काराणामभिज्ञानाय प्रेरणम्
- काव्यशास्त्रीयोदाहरणपद्यानि संश्राव्य तेषां लक्षणकथनाय समुत्प्रेरणम्
- लक्षणानि निरूप्य तेषामुदाहरणनिर्णयार्थं निर्देशनम्

**(ग) पठनशिक्षणस्य सम्भाव्याः शिल्पगताः संयुक्तक्रियाकलापाः**

- छन्दोलक्षणोदाहरणानां सस्वरपठनाय निर्देशनम्
- गण-लय-यति-गतिनियमपालनपूर्वकं पद्यानां पठनाय प्रेरणम्
- गद्यवाक्यानि पठित्वा तदनुपठितुमादेशप्रदानम्
- तारमधुरस्वरेण गद्यपद्यानां पठनायादेशनम्
- मन्दगत्या द्रुतगत्या च गद्यांशानां वाचनायोत्प्रेरणम्
- काव्यशास्त्रीयकारिकोदाहरणपद्यानां पठनाय प्रेरणम्
- निर्दिष्टपाठानामादर्शवाचनायाभिप्रेरणम्
- निर्दिष्टपाठातिरिक्तोपलब्धगद्यपद्यानां पठनायाभिप्रेरणम्

**(घ) लेखनशिक्षणस्य सम्भाव्याः शिल्पगताः संयुक्तक्रियाकलापाः**

- छन्दोलक्षणोदाहरणानां शुद्धलेखनायोत्प्रेरणम्
- छन्दोलक्षणमुक्त्वा तस्योदाहरणलेखनाय निर्देशनम्
- पद्यमुक्त्वा तस्य छन्दोनामोल्लेखनपुरस्सरं गणयतिव्यवस्थालेखनाय समुत्प्रेरणम्
- पद्यानां शुद्धलेखनायादेशप्रदानम्
- निर्दिष्टरूपक-महाकाव्यगतपद्यानामन्वयलेखनायाभिप्रेरणम्
- निर्दिष्टपद्यानां पृथक् पृथक् प्रसङ्गान्वय-पर्याय-कोश-समासादलङ्कारादिलेखनाय तेषां व्याख्यानाय चोत्प्रेरणम्
- निर्दिष्टगद्यांशस्य पृथक् पृथक् प्रसङ्ग-पर्याय-कोश-समासादलङ्कारादिलेखनाय व्याख्यानाय चोत्प्रेरणम्
- स्रष्टृपरिचय-तत्काव्यवैशिष्ट्यानि लेखितुमादेशनम्
- गद्य-पद्यनिहितवस्तु-चरित्र-भाषासौन्दर्यादिविषयाणां लेखनायाभिप्रेरणम्
- रसप्रकाराणां लक्षणोदाहरणलेखनाय समुत्प्रेरणम्

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धेः सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशाः क्रियाकलापा विधेयाः । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्न वेति विषयस्यान्वेषकं महत्वपूर्णं संयन्त्रं मूल्याङ्कनमस्ति । विद्यार्थिनां मूल्याङ्कने स्तरगतक्षमतानां शिक्षणोपलब्धीनां च विचारो विधेयः । आन्तरिकमूल्याङ्गनविधिना बाह्यमूल्याङ्गनविधिना चास्मिन् विषये विद्यार्थिनां मूल्याङ्गनं कार्यम् । मूल्याङ्कनस्य

समग्रभारात् प्रतिशतं पञ्चविंशत्यङ्का आन्तरिकमूल्याङ्कने पञ्चसप्तत्यङ्काश्च बाह्यमूल्याङ्कने प्रदेयाः । मूल्याङ्कनं निर्माणात्मकपद्धत्य निर्णयात्मकपद्धत्या क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतक्षमतानाम्, कक्षागतशिक्षणोपलब्धीनाम्, विषयवस्तूनाम्, शिल्पस्य, शिक्षणसहभागितायाः शिक्षणसक्रियतायाश्चाधारेण विद्यार्थिनां मूल्याङ्कनं विधातव्यम् ।

छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमण-घटनावलोकन-सर्जनकार्य-वैयक्तिकसामूहिकविमर्शन-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारप्रभृतिकार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते, येन अविच्छिन्नं मूल्याङ्कनं सम्पद्यते । स्तरगतसामर्थ्योपलब्धये कक्षागतसामर्थ्योपलब्धये च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्यावलम्बन-वाङ्मयसंरक्षण-वाङ्मयस्योपयोग-प्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते ।

मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपां कर्तुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यंसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्या अङ्गानां कृते आन्तरं परीक्षणं, प्रतिशतं पञ्चसप्तत्या अङ्गानां कृते बाह्यं परीक्षणञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेणैव विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धयः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीयाः । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

### (क) आन्तरं मूल्याङ्कनम्

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं मूल्याङ्कनं कर्तव्यम् । व्याकरणस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरविधिः
- मौखिकप्रश्नोत्तरविधिः
- छात्राणां परस्परविचारविमर्शविधिः

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानशिल्पादिकमधिगतं न वेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

## मूल्याङ्कनार्थमङ्कविभागः

## कक्षा १०

| क्र.सं. | विषयः | प्रकरणम् | अङ्कविभागः | सैद्धान्तिकः | प्रयोगात्मकः |
|---|---|---|---|---|---|
| १ | काव्यशास्त्रम् | छन्दः रसश्च | २० | १५ | ५ |
| २ | पद्यकाव्यम् | महाकाव्यांशः (कुमारसम्भवस्य निर्धारितांशः) | १६ | १२ | ४ |
| ३ | पद्यकाव्यम् | महाकाव्यांशः (कार्तवीर्योदयस्य निर्धारितांशः) | १२ | ९ | ३ |
| ४ | गद्यकाव्यम् | गद्यकाव्यांशः (भोजप्रबन्धस्य निर्धारितांशः ) | १६ | १२ | ४ |
| ५ | गद्यकाव्यम् | गद्यकाव्यांशः (कादम्बरीकथायाः निर्धारितांशः) | १२ | ९ | ३ |
| ६ | दृश्यकाव्यम् | एकाङ्कम् | ८ | ६ | २ |
| ७ | गद्यम् | प्रबन्धः, कथा, जीवनवृत्तञ्च | १६ | १२ | ४ |
|  |  | योगः | १०० | ७५ | २५ |

# विशिष्टीकरणतालिका

**कक्षा : १०** **पूर्णाङ्का: ७५**
**समयः घण्टात्रयम्**

| क्र. स. | विषयक्षेत्रम् (पठनं लेखनञ्च) | प्रश्नस्य प्रकृतिः | ज्ञानम् | | | बोधः | | | शिल्पम् | | | उच्चदक्षता | | | पृष्ट-प्रश्न-सङ्ख्या | अङ्क-भारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १. | काव्य-शास्त्रम् ( छन्दः रसश्च) | ज्ञान-बोध-शिल्पोच्चदक्षताप्रयोगात्मिका | १ | - | - | १ | - | - | - | ५ | - | - | - | ८ | ४ | १५ | **ज्ञानबोधक्षेत्रतः**<br>-छन्दोलक्षण-गतियतिलयवर्णसंख्या-रसभावादिसंख्याप्रकाशनसम्बद्धौ द्वौ प्रश्नौ<br>**शिल्पक्षेत्रतः**<br>-वार्णिकमात्रिकवृत्तपार्थक्यप्रकाशकः, रसलक्ष्यलक्षणसमन्वयप्रदर्शनपरो वा एकः प्रश्नः<br>**उच्चदक्षता**क्षेत्रतः<br>-अधीतलक्षणस्य वृत्तस्योदाहरणान्तरेण सह समन्वयप्रदर्शकः<br>अधीतलक्षणस्य रसस्य उदाहरणान्तरेण सह समन्वयप्रदर्शनसम्बद्धो वा एकः प्रश्नः |
| २. | पद्यकाव्यम् ( महाकाव्यांशः ) | ज्ञान-बोधशिल्पप्रयोगात्मिका | १ | | - | १ | - | - | - | १० | - | | - | | ४ | १२ | **ज्ञानबोधक्षेत्रतः**<br>कविनाम-छन्दोनाम-सर्गसंख्या-श्लोकसंख्या-पदपर्याय-पदविग्रहादिप्रकाशकौ द्वौ प्रश्नौ<br>**शिल्पक्षेत्रतः**<br>पद्यव्याख्या-पद्यभाव-काव्यशैली-भाषाशैली-काव्यसौन्दर्य-नायकचरित्रादिप्रकाशकौ द्वौ प्रश्नौ |
| ३. | पद्यकाव्यम् ( महाकाव्यांशः) | बोधोच्चदक्षताप्रयोगात्मिका | | - | - | १ | - | - | - | | - | - | - | ८ | २ | ९ | **बोधक्षेत्रतः**<br>छन्दोनाम-कविनाम-प्रकाशनवर्ष-सर्गश्लोकादिसंख्या-श्लोकनिहितवैशिष्ट्य-पदपर्याय-विग्रहादिप्रकाशकः एकः प्रश्नः<br>**उच्चदक्षताक्षेत्रतः**<br>कोशपर्यायविग्रहरसभावालङ्कारादिप्रकाशकः, पद्यगतभावार्थगूढार्थकाव्यवैशिष्ट्यकाव्यसौन्दर्यादिविशष्टविषयप्रकाशको वा एकः प्रश्नः |
| ४. | गद्यकाव्यम् ( | ज्ञान- | १ | | - | १ | - | - | - | १० | - | - | - | | ४ | १२ | **ज्ञानबोधक्षेत्रतः** |

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | गद्यकाव्यांशः) | बोधशिल्पप्रयोगात्मिका | | | | | | | | | | | | | | | कविनाम-चरितविशेष-निःश्वासोच्छ्वासादि-पदपर्यायविग्रह-रसालङ्कारादिप्रकाशनसम्बद्धौ द्वौ<br>**शिल्पक्षेत्रतः**<br>गद्यव्याख्या-गद्यभाव-काव्यशैली-भाषाशैली-काव्यसौन्दर्य-नायकचरित्रादिप्रकाशकौ द्वौ प्रश्नौ |
| ५. | गद्यकाव्यम् (गद्यकाव्यांशः) | ज्ञान-बोधोच्चदक्षताप्रयोगात्मिका | | - | - | १ | - | - | - | | - | - | - | ८ | २ | ९ | **ज्ञानबोधक्षेत्रतः**<br>कविनाम-चरितविशेष-निःश्वासोच्छ्वासादि-पदपर्यायविग्रह-रसालङ्कारादिप्रकाशनसम्बद्धः एकः प्रश्नः<br>**उच्चदक्षताक्षेत्रतः**<br>कोशपर्यायविग्रहरसभावालङ्कारादिप्रकाशकः, गद्यगतभावार्थगूढार्थकाव्यवैशिष्ट्यकाव्यसौन्दर्यादिविशिष्टविषयप्रकाशको वा एकः प्रश्नः |
| ६. | दृश्यकाव्यम् (एकाङ्कम्) | ज्ञान-शिल्पप्रयोगात्मका | १ | - | - | | - | - | - | ५ | - | - | - | | २ | ६ | **ज्ञानक्षेत्रतः**<br>- दृश्यकाव्यपरिभाषा-पात्रनाम-लेखक-पात्रविशेषकथनादिसम्बद्धः एकः प्रश्नः<br>**शिल्पक्षेत्रतः**<br>निर्दिष्टदृश्यकाव्यसौन्दर्य-भावसौन्दर्य-पात्रवैशिष्ट्योक्तितात्पर्यादिप्रकाशनसम्बद्धः एकः प्रश्नः<br>: |
| ७. | गद्यम् ( प्रबन्धः, कथा, जीवनवृत्तञ्च) | शिल्पोच्चदक्षताप्रयोगात्मिका | १ | - | - | १ | - | - | - | १० | - | - | - | | ४ | १२ | **ज्ञानबोधक्षेत्रतः**<br>कथाप्रबन्धजीवनवृत्तपरिभाषा-चरित्रनाम-लेखकनाम-भणितिनिर्णयन-विशिष्टपदगतार्थप्रकाशनादिसम्बद्धौ द्वौ प्रश्नौः<br>**शिल्पक्षेत्रतः**<br>निर्दिष्टकथाप्रबन्धजीवनवृत्तसन्देश-तात्पर्य-भावौचित्यादिप्रकाशनसम्बद्धः एकः, मौलिकलघुकथाप्रबन्धजीवनवृत्तादिलेखनसम्बद्धः एकश्चेति कृत्वा द्वौ प्रश्नौ |
| योगः | | | ६ | | | ५ | | | | ४० | | | | २४ | २२ | ७५ | |

**द्रष्टव्यः** ‘क’ इत्यनेन अतिलघुप्रश्नो बोध्यः ।
‘ख’ इत्यनेन लघुप्रश्नो बोध्यः ।

‘ग’ इत्यनेन सामान्यतया विस्तृतोत्तरापेक्षी (व्याख्यात्मकः) प्रश्नो बोध्यः ।

**पुनश्च** - ज्ञानबोधक्षेत्राद् विकल्परहिताः प्रश्नाः प्रष्टव्याः । शिल्पक्षेत्राद् आहत्य वैकल्पिकप्रश्नद्वयेन युताः अष्टौ प्रश्नाः प्रष्टव्याः । उच्चदक्षताक्षेत्राद् आहत्य एकेन वैकल्पिकप्रश्नेन युताः त्रयः प्रश्नाः प्रष्टव्याः ।

# संस्कृतसाहित्यम्

निदर्शनप्रश्नाः

२०७८

कक्षा - १०　　　　　　　　　　　　　　　　　　　　　समयः घण्टात्रयम्

**समूहः ‘ क ’**　　　　　　　　　　　　　　　　**पूर्णाङ्काः ७५**

१.　**अधो लिखिते पद्ये वृत्तलक्षणं सङ्गमयत**　८

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥

२.　**अधस्तनपद्यस्य भावार्थं काव्यगतवैशिष्ट्यञ्च प्रकाशयत**　८

विद्यालतासमवलम्बविशालशाले
सुप्राज्यराज्यकमलाविमलालयेऽस्मिन् ।
स्थाने निधाय तनये सनये विधात्रा
भारं भवान्भवहरं पदमीक्षतान्द्राक् ॥

३.　**अधो लिखितं गद्यांशं सप्रसङ्गं कोशपर्यायविग्रहभावालङ्कारसन्देशान् प्रकाश्य व्याख्यात**　८

मदजलदुर्दिनान्धकारगजघटितघनघटापरिपालितापि प्रपलायते । न परिचयं रक्षति । नाभिजनमीक्षते । न रूपमालोकयते । न कुलक्रममनुवर्तते । न शीलं पश्यति । न वैदग्ध्यं गणयति । न श्रुतमाकर्णयति । न धर्ममनुरुध्यते ।

न त्यागमाद्रियते । न विशेषज्ञतां विचारयति । नाचारं पालयति । न सत्यमनुबुध्यते । न लक्षणं प्रमाणीकरोति । गन्धर्वनगरलेखेव पश्यत एव नश्यति ।

**अथवा**

वाणभट्टस्य देशकालकृतिकाव्यवैशिष्ट्यानि विवेचयत ।

**समूहः 'ख'**

सङ्क्षेपेणोत्तरयत ।

**४. अधस्तनपद्यस्य रसं संसाधयत** **५**

एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।

लीलाकमलपत्राणि गणयामास पार्वती ॥

**५. एतस्य पद्यस्य भावार्थं लिखत** **५**

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।

एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥

**अथवा**

कुमारसम्भवमहाकाव्यस्य प्रथमसर्गमाश्रित्य हिमालयस्य महत्वं वर्णयत ।

**६. अधस्तनगद्यांशस्य कथनसौन्दर्यं व्याख्यात** **५**

विप्र ! भवन्नाम्ना कान्यक्षराणि सौभाग्यावलम्बितानि ? कस्य वा देशस्य सुजनान् बाधते भवद्विरह इति । ततः कविरलिखत् राज्ञो हस्ते ' कालिदासः ' इति ।

७. **दृश्यकाव्ये चरित्राणां भूमिकां निरूपयत ।** **५**

८. **कथाजीवनवृत्तयोः साम्यवैषम्ये प्रदर्शयत ।** **५**

९. **अधो लिखितायाः सूक्तेस्तात्पर्यं प्रकाशयत** **५**

क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव ।

१०. **राज्ञो भोजस्य चरित्रचित्रणं कुरुत ।** **५**

११. **'राष्ट्रसेवा' इति विषये लघुप्रबन्धं लिखत ।** **५**

**अथवा**

**महाकवेः सुकृतिदत्तपन्तस्य जीवनचरितबोधकानि सूत्राणि निर्मात ।**

**समूहः 'ग'**

**१२ . अधो लिखितान् प्रश्नान् अतिसङ्क्षेपेणोत्तरयत** **११×१=११**

(क) अद्भुतरसस्य स्थायिभावः कः ?

(ख) कुमारसम्भवमहाकाव्यस्य प्रथमं पद्यं कस्मिन् वृत्तेऽस्ति ?

(ग) राज्ञो भोजस्य पितुर्नाम किम् ?

(घ) 'रूपकम्' इति पदस्य कोऽर्थः ?

(ङ) चन्द्रापीडः केन उपदिष्टः ?

(च) शिखरिणीवृत्तस्य प्रतिपादं के गणा भवन्ति ?

(छ) जीवनवृत्तं किम् ?

(ज) 'विदुषाम्' , 'समुन्नतेन' इति पदयोः पर्यायौ कौ ?

(झ) 'संलीयते विमलविष्णुपदे स धन्यः' इत्यत्र किं वृत्तम् ?

(ञ) 'कथा' इति पदस्य धातुप्रत्ययौ प्रदर्शयत ।

(ट) 'नगाधिराजः' , 'वनेचराणाम्' इति पदयोः विग्रहः कीदृशो भवति ?

**द्रष्टव्यम्** - पाठ्यपुस्तकस्य निर्माणानन्तरं ' ख-ग' समूहयोः कथा-प्रबन्ध-दृश्यकाव्य-जीवनचरितसम्बद्धानां प्रश्नानामङ्कान् विहाय स्वरूपं परिवर्तिष्यते ।

समाप्तम्